षिभेदे पु० "आत्रेयः कुण्डजठरोद्विजः कालघटस्तथा" भा०आ० ५३अ०,

**कुण्डधार** त्रि० कुण्डं कुण्डाकारं धारयति धारि—अण् उप० स० । नागभेदे, "मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ" भा० स० ९अ०,

**कुण्डपायिन्** पु० भूम्नि कुण्डेन कुण्डाकारचमसेन पिबन्ति सोमम् पा—णिनि । कुण्डेन सोमपायिषु सयजमान षोडशर्त्विक्साध्यसत्रभेदकारिषु

**कुण्डपायिनामयन** न० ६त०अलुक् स० । सत्रभेदे तदितिकर्त्तव्यतादिकम् आश्व०श्रौ०१२।२।२—सूत्रादौ उक्तं यथा "कुण्डपायिनामयनम्"सू० । "एतन्नामकमिदं सत्रमधिकृतं वेदितव्यम्"वृ०। "मासन्दीक्षिता भवन्ति" सू०। "अयं मासशब्द एकान्नविंशतिरात्रे उपचरितः, एकान्नविंशतिरात्रादिकं सावनवद्भवतीत्यर्थः" वृ० । "ते मासि सोमं क्रीणन्ति" सू० । "अयमप्युपचार एव दीक्षाकाले । मासातीते दीक्षिताः सोमं क्रीणन्तीत्यर्थः" वृ० । "तेषां द्वादशोपसदो भवन्ति"सू०। "सात्त्रिकाणान्दीक्षाणामपवादो दीक्षाविधिः, तथा सात्त्रिकाणामुपसदामपवादोऽयमुपसद्विधिः"वृ० । "सोममुपनह्य प्रवर्ग्यपात्राण्युत्साद्योपनह्य वा मासमग्निहोत्रं जुह्वति"सू०। "उपत्सस्वतीतासु प्रवर्ग्यपात्राण्युत्साद्योपनह्य वा तानि तानि, ते एकं मासम् अग्निहोत्रं जुह्वति सायं प्रातः"वृ०।"प्रातरुपक्रमः सायमपवर्गः"सू० "प्रातःकालस्य प्रथमप्राप्तत्वात् उपसत्काले द्वादशाहेऽतीतेऽग्निहोत्रस्य प्रातरारम्भान्नैमित्तिकादग्निहोत्रात् कर्म्मान्तरमेतदिति न्यायविदां प्रसिद्धम्"वृ० । "मासं दर्शपूर्णमासाभ्यां यजन्ते" सू० । "अग्निहोत्रमासेऽतीते ततः अनन्तरमेकं मासं दर्शपूर्णमासाभ्यां यजन्ते"वृ० ।"कृष्णपक्षेऽहरहः पौर्णमास्या, शुक्लपक्षेऽहरहरमावास्यया, मित्रावरुणयोरयने तथा दृष्टत्वात्" सू० । "एवमत्र सम्पादनीयम्—यथा कृष्णपक्षादौ पौर्णमास्याऽहः सम्भवति, तत्र दीक्षारम्भः कर्त्तव्य इति" वृ० । "मासं वैश्वदेवेन" सू० । "अहरहरनेन यष्टव्यम् । वैश्वानरपार्जन्या तु न भवति आरम्भार्थत्वात्तस्याः, स चारम्भःसत्रे न प्रसक्त इति"वृ०। "मासं वरुणप्रघासैः मासं शाकमेधैः एतैरहरहर्यजेरन्"सू०"एकाहेनापवृज्य प्रकृतेर्द्व्यहसमापनीयत्वाद्व्यहेन वा कुर्य्यात् । अध्वर्युप्रत्ययात्समापनमिति स्थितिः"वृ०।"मासं शुनासीरीयेण" सू०। "अनेनाप्यहरहरेव" वृ०। "यदहर्मासः पूर्य्यते तदहरिष्टिं समाप्याग्निप्रणयनादिधर्मोत्सादनादि वौपवसथिकं कर्म्म कृत्वा श्वोभूते प्रसुनुयुः"सू०। "यस्मिन्नहनि मासः पूर्य्यते तस्मिन्नहनि शुनासीरीयेष्टिं समाप्य तदनन्तरं यदि पूर्व्वमेव प्रवर्ग्यपात्राण्युत्सादितानि तदाग्निप्रणयनाद्यौपवसथिकं कर्म्म कृत्वा सुत्यारम्भः"वृ० । "तत्रैक उपसद्भ्य एवानन्तरं कुर्वन्ति तथादृष्टत्वात् सौत्यान्मासानग्निहोत्रादीन् वदन्तः"सू० । "तदिदमग्निप्रणयनाद्यौपवसथिकं कर्म्म कुण्डपायिनामयने अग्निहोत्रादिमासेभ्यः कर्त्तव्यमित्युक्तम् तत्रैक आहुः तत्कर्माग्निहोत्रादिमासेभ्यः प्रागुपसद्भ्योऽनन्तरं कर्त्तव्यमिति । तत्र हेतुमाहुः प्रकृतौ तथादृष्टत्वादिति । न त्वग्निहोत्रादिमासेभ्य उपरिष्टात्, क्रियमाणे वा औपवसथिके सुत्यानन्तरस्य विद्यमानत्वादिति । तथादृष्टत्वात्साधारणमिति, तत्परिहारार्थमग्निहोत्रादिमासान् सौत्यानिति । कथम् ? अस्य सत्रस्य गवामयनप्रकृतिकत्वात्तस्य सांवत्सरिकत्वात् कुण्डपायिनामयने त्रिवृदादयः षण्मासा एकः पक्षः, अग्निहोत्रादयः षण्मासा अपरः पक्ष इति मन्यमानाः । एवं च उपसदाञ्च सुत्यानाञ्च सुत्ये औपवसथिकस्य कृतत्वान्न कश्चिद्वेतुदोष इति वदन्तोऽग्निहोत्रादिमासेभ्यः प्रागुपसद्भ्यः ऊर्द्ध्वमौपवसथिकं कुर्वन्ति । एतदुक्तम् भवति । अग्निहोत्रादिमासान् सुत्यानिति मन्यमानाः तेभ्यः पुरस्तादुपसद्भ्य ऊर्द्ध्वं औपवसथिकं कर्म्म केचित् कुर्वन्ति प्रकृतौ तथादृष्टत्वादिति । यदेतदग्निहोत्रादिमासान् सौत्यानिति वदन्ति तदनुपपन्नम् । कुतः ? सोमयागस्वरूपत्वात् सुत्यानाम् अग्निहोत्रादीनां तु हविर्यज्ञस्वरूपत्वादसुत्यत्वमिति । यत्पुनरिदमुक्तं गवामयनप्रकृतिकत्वादग्निहोत्रादिमासैः पूर्वपक्षसिद्धिरिति । तदयुक्तम् सोमयागानामेव गवामयनप्रकृतिकत्वं पूर्वपक्षस्योत्तरपक्षस्य चेति । अग्निहोत्रादयोऽस्मिन् सत्रे अप्राकृता आगन्तवः कर्म्मविशेषाः अतस्तेषान्तत्स्थानापन्नत्वमपि न सम्भवति । अतस्तेषां सुत्यत्वन्न सम्भवति । सुत्यत्वासम्भवे तथादृष्टत्वादित्यस्य हेतोः साधारण्यादसाधकत्वादित्यनेनाभिप्रायेणोक्तं भगवताचार्य्येण'तदनुपपन्नम् इति" वृ० "पश्वर्थं ह्यग्निप्रणयनन्तस्य च श्वःसुत्यानिमित्तम्"सू०। "परोक्तस्य हेतोरसाधकत्वमुक्त्वा स्वपक्षं समर्थयति। औपवसथ्येषु कर्म्मसु यः पशुभागः सः श्वःसुत्यानिमित्तमिति प्रत्यक्षं श्रूयते 'अग्नीषोमाभ्यामिन्द्रो वृत्रमहंस्तावेनमब्रूताम्' इत्यादिना । अतो वचनात् पशोः सुत्यानन्तर्य्यमेव स-